# ॥ श्रीपरिज्ञानाश्रमत्रयोदशी ॥

आनन्दाश्रमशिष्याग्र्यं स्वानन्दाम्बुधिमज्जितम् ।
आनन्दाश्रमिणं वन्दे परिज्ञानाश्रमं गुरुम् ॥ १ ॥

श्रीविद्योपासनोद्याने मायूरं विभ्रमं सदा ।
यश्चक्रे तं नुमो नित्यं परिज्ञानाश्रमंगुरुम् ॥ २ ॥

बाल्ये दीपनमस्कारे यस्य वैराग्यधीशिखा ।
जज्वाल तं सदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ३ ॥

शिष्यान्तश्शोधने यद्वत्तद्वद्यन्त्रालिशोधने ।
कौतुकं यस्य तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ४ ॥

भवरोगहरो योऽभूच्छिवयोगपरोऽनिशम् ।
तं वन्दे सिद्धिसम्पन्नं परिज्ञानाश्रमं गुरुम् ॥ ५ ॥

शुनि चैव समदृष्टा ज्ञानीत्यागमदृष्टये ।
आसीद्यस्तं नुमो हार्दं परिज्ञानाश्रमं गुरुम् ॥ ६ ॥

सारस्वतजनप्रीतस्सारस्वतसमर्चकः ।
य आसीत् तं मुदा वन्दे परिज्ञानाश्रमं गुरुम् ॥ ७ ॥

विद्यावृद्धस्तपोवृद्धो वयोवृद्धाश्रयोबभौ ।
यः कारुण्येन तं वन्दे परिज्ञानाश्रमं गुरुम् ॥ ८ ॥

© Shrī Chitrāpur Maṯh. All rights reserved
Shrī Chitrāpur Maṯh, Shirālī, Uttara Kannaḍa, Karnāṭaka - 581354, India
www.chitrapurmath.net

योऽनुकर्तुं विभुं चक्रे विश्ववस्त्वालयङ्करम् ।
वस्त्वागारं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥९॥

निर्मिमे निर्ममेन्द्रो यस्स्तवान् वेदान्तवासितान् ।
गीतासक्तं नुमस्तं श्रीपरिज्ञानाश्रमं गुरुम् ॥१०॥

कैवल्यसन्निकर्षत्वे तथाऽहङ्ग्रहचिन्तने ।
यस्यासीद्दृहृदयं वन्दे परिज्ञानाश्रमं गुरुम् ॥११॥

भक्तचेतोरथाध्यक्षो रथयात्रां महेशितुः ।
यश्चक्रे तं नुमोऽजस्रं परिज्ञानाश्रमं गुरुम् ॥१२॥

दुर्गं निर्माय दुर्गायै स्वसर्गं यो रुरोध तम् ।
अपवर्गपदं वन्दे परिज्ञानाश्रमं गुरुम्
अपवर्गप्रदं वन्दे परिज्ञानाश्रमं गुरुम् ॥१३॥

श्री श्री परिज्ञानाश्रमयतीश्वराणां
तुर्याश्रमालङ्कृतिरूपकाणाम् ।
स्तोत्रं पठेद्यः प्रयतः प्रणम्रः
प्राप्नोति पूर्णां करुणां गुरूणाम् ॥ ॥१४॥

© Shrī Chitrāpur Math. All rights reserved
Shrī Chitrāpur Math, Shirālī, Uttara Kannaḍa, Karnāṭaka - 581354, India
www.chitrapurmath.net